শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রীকৃষ্ণাষ্টোত্তরশতনামস্তোত্রম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ
# ॥ শ্রীকৃষ্ণাষ্টোত্তরশতনামস্তোত্রম্ ॥

ছাযাযাং পারিজাতস্য হেমসিংহাসনোপরি।
আসীনমম্বুদশ্যামমাযতাক্ষমলংকৃতম্॥

চন্দ্রাননং চতুর্বাহুং শ্রীৱতসাঙ্কিতৱক্ষসম্।
রুক্মিণীসত্যভামাভ্যাং সহিতং কৃষ্ণমাশ্রযে॥

শ্রীকৃষ্ণঃ কমলানাথো ৱাসুদেৱঃ সনাতনঃ।
ৱসুদেৱাত্মজঃ পুণ্যো লীলামানুষৱিগ্রহঃ॥ ১॥

শ্রীৱতসকৌস্তুভধরো যশোদাৱতসলো হরিঃ।
চতুর্ভুজাত্তচক্রাসিগদাশঙ্খাদ্যুদাযুধঃ॥ ২॥

দেৱকীনন্দনঃ শ্রীশো নন্দগোপপ্রিযাত্মজঃ।
যমুনাৱেগসংহারী বলভদ্রপ্রিযানুজঃ॥ ৩॥

পূতনাজীৱিতহরঃ শকটাসুরভঞ্জনঃ।
নন্দৱ্রজজনানন্দী সচ্চিদানন্দৱিগ্রহঃ॥ ৪॥

নৱনীতৱিলিপ্তাঙ্গো নৱনীতনটোনঘঃ।
নৱনীতনৱাহারো মুচুকুন্দপ্রসাদকঃ॥ ৫॥

ষোডশস্ত্রীসহস্রেশস্ত্রিভঙ্গী মধুরাকৃতিঃ।
শুকৱাগমৃতাব্ধীন্দুর্গোৱিন্দো যোগিনাং পতিঃ॥ ৬॥

ৱতসৱাটচরোনন্তো ধেনুকাসুরভঞ্জনঃ।
তৃণীকৃততৃণাৱর্তো যমলার্জুনভঞ্জনঃ॥ ৭॥

উত্তালতালভেত্তা চ তমালশ্যামলাকৃতিঃ।
গোপগোপীশ্বরো যোগী কোটিসূর্যসমপ্রভঃ॥ ৮॥

ইলাপতিঃ পরংজ্যোতির্যাদৱেন্দ্রো যদূদ্বহঃ।
ৱনমালী পীতৱাসাঃ পারিজাতাপহারকঃ॥ ৯॥

গোৱৰ্ধনাচলোদ্ধৰ্তা গোপালঃ সৰ্ৱপালকঃ।
অজো নিরঞ্জনঃ কামজনকঃ কঞ্জলোচনঃ॥ ১০ ॥

মধুহা মথুরানাথো দ্বারকানাযকো বলী।
ৱৃন্দাৱনান্তঃ সঞ্চারী তুলসীদামভূষণঃ॥ ১১ ॥

স্যমন্তকমণের্হৰ্তা নরনারাযণাত্মকঃ।
কুব্জাকৃষ্ণাংবরধরো মাযী পরমপূরুষঃ॥ ১২ ॥

মুষ্টিকাসুরচাণূরমল্লযুদ্ধৱিশারদঃ।
সংসারৱৈরী কংসারির্মুরারির্নরকান্তকঃ॥ ১৩ ॥

অনাদিব্রহ্মচারী চ কৃষ্ণাৱ্যসনকর্ষকঃ।
শিশুপালশিরশ্ছেত্তা দুর্যোধনকুলান্তকঃ॥ ১৪ ॥

ৱিদুরাক্রূরৱরদো ৱিশ্বরূপপ্রদর্শকঃ।
সত্যৱাক্ সত্যসঙ্কল্পঃ সত্যভামারতো জযী॥ ১৫ ॥

সুভদ্রাপূৰ্ৱজো ৱিষ্ণুর্ভীষ্মমুক্তিপ্রদাযকঃ।
জগদ্গুরুর্জগন্নাথো ৱেণুনাদৱিশারদঃ॥ ১৬ ॥

ৱৃষভাসুরৱিধ্বংসী বাণাসুরকরান্তকঃ।
যুধিষ্ঠিরপ্রতিষ্ঠাতা বর্হিবর্হাৱতংসকঃ॥ ১৭ ॥

পার্থসারথিরৱ্যক্তো গীতামৃতমহোদধিঃ।
কালীযফণিমাণিক্যরঞ্জিতশ্রীপদাম্বুজঃ॥ ১৮ ॥

দামোদরো যজ্ঞভোক্তা দানৱেন্দ্রৱিনাশকঃ।
নারাযণঃ পরং ব্রহ্ম পন্নগাশনৱাহনঃ॥ ১৯ ॥

জলক্রীডাসমাসক্তগোপীৱস্ত্রাপহারকঃ।
পুণ্যশ্লোকস্তীর্থপাদো ৱেদৱেদ্যো দযানিধিঃ॥ ২০ ॥

সৰ্ৱতীর্থাত্মকঃ সৰ্ৱগ্রহরূপী পরাতপরঃ।
এৱং শ্রীকৃষ্ণদেৱস্য নাম্নামষ্টোত্তরং শতম্॥ ২১ ॥

কৃষ্ণনামামৃতং নাম পরমানন্দদাযকম্।
অত্যুপদ্রৱদোষঘ্নং পরমাযুষ্যৱর্ধনম্॥ ২২ ॥

॥ ইতি শ্রীকৃষ্ণাষ্টোত্তরশতনামস্তোত্রং সংপূর্ণম্ ॥